सर्व्वं व्रतसमाप्तौ च श्रीकृष्णस्य प्रसादतः ।
यद्यद्दानादिकञ्चैव लेख्यं तत्तच्च कार्त्तिके ॥
स्तुत्वाथ कृष्णमभ्यर्च्य प्रसाद्य च पुनः पुनः ।
शेषं शक्तोदतीर्थे च स्नौकुर्य्याद्वैष्णवैः सह ॥
गीतनृत्यादिना देवं परितोष्याथ वैष्णवान् ।
संपूज्य नरयानेन देवं स्वालयमानयेत् ॥
प्रभोर्नीराजनं कृत्वा विसर्ज्ज्य वत वैष्णवान् ।
निवेश्य स्वासने देवं शयीत भुवि तं स्मरन् ॥
एवञ्च कुर्व्वतो मासाश्चत्वारो यान्ति ते सुखम् ।
अन्यथा प्रभवेद्दुःखमनाहत्य च जायते ॥
तथा च भविष्ये ।
मिथुनस्थे सहस्रांशौ न स्नापयति यो हरिम् ।
वैष्णवैः सह सम्भूय स्नानाहन्तिदा भवेत् ॥
किञ्च । भविष्योत्तरे ।
यो देवशयनं पार्थ ! अनुमोद्य समाचरेत् ।
उत्थानं वापि कृष्णस्य स हरेर्लोकमाप्नुयात् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

चातुर्व्वर्ण्यं, क्ली, (चत्वारो वर्णाः । "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् ।" इति ष्यञ् ।) ब्राह्मणक्षत्रियवैश्यशूद्राः । इति हेमचन्द्रः । ३।४७२॥ (यथा, मनुः । १२ । १ ।
"चातुर्व्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्म्मस्त्वयानघ !॥")
चतुर्वर्णधर्म्मश्च ॥

चातुर्व्वैदः, पुं, (चतुरो वेदानधीते इति चतुर्व्वेदः । स एव । "चतुर्वेदस्योभयपदवृद्धिश्च ।" इति ष्यञ् ।) चातुर्विद्यः । चतुर्व्वेदवेत्ता । इति व्याकरणम् ॥

चात्वाल, क्ली पुं, (चतते याचते इति । चत+ "चायतिम्हनेरालञ्वालञालीयचः ।" उणा १ । ११५ । इति वालञ् ।) गर्त्तः । अग्निहोत्रोपकरणम् । इति संक्षिप्तसारे उणादिवृत्तिः॥ (यथा, तैत्तिरीयसंहितायाम् । ६ ।१ । ३ । ८ ।
"योनिर्वै यज्ञस्य चात्वालम् ॥")

चान्द्रं, क्ली, (चन्द्रस्य इदम् । चन्द्र+अण् । यद्वा, चन्द्राय चन्द्रलोकप्राप्तये इदम् ।) चान्द्रायणम् । इति प्रायश्चित्ततत्त्वम् ॥

चान्द्रः, पुं, (चन्द्रस्यायम् । "तस्येदम् ।" ४।३।१२०। इत्यण् ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४।१३३ ॥ चान्द्रमासः । इति शब्दरत्नावली ॥

चान्द्रकं, क्ली, (चान्द्रं आर्द्रकमिव कायतीति । कै+कः ।) शुण्ठी । इति राजनिर्घण्टः ॥

चान्द्राख्यं, क्ली, (चान्द्रमित्याख्या संज्ञा यस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

चान्द्रभागा, स्त्री, (चान्द्रश्चन्द्रसम्बन्धी भागो यस्याम्) चन्द्रभागानदी । इति द्विरूपकोषः ॥

चान्द्रमसं, क्ली, (चन्द्रमाश्चन्द्रोऽधिष्ठातृदेवता यस्य । चन्द्रमस्+अण् ।) मृगशिरोनक्षत्रम् । इति हेमचन्द्रः । २ । २३ ॥ (चन्द्रमसश्चन्द्रस्य इदम् । चन्द्रमस्+"तस्येदम् ।" ४ । ३ ।१२० । इत्यण् ।) चन्द्रमस्सम्बन्धिनि त्रि ॥ (यथा, महाभारते । १२ । २५० । ३० ।
"सर्व्वतः सुखमन्वेति वपुश्चान्द्रमसं यथा ॥")

चान्द्रमसायनः, पुं, (चन्द्रमसोऽपत्यं पुमान् । चन्द्रमस्+फक् ।) बुधग्रहः । इति हलायुधः ॥ ("तिकादिभ्यः फिञ् ।" ४ । १ । १५५ । इति फिञ् ।) चान्द्रमसायनिश्च ॥

चान्द्रमासः, पुं, (चान्द्रश्चन्द्रसम्बन्धी मासः ।) चन्द्रसम्बन्धिमासः । स तु गौणमुख्यभेदेन द्विविधः । तत्राद्यः कृष्णप्रतिपदादिपौर्णमास्यन्तः । द्वितीयः शुक्लप्रतिपदादिदर्शान्तः । सामान्यत्रिंशत्तिथ्यात्मकमासश्च ॥ तत्र मुख्यचान्द्रे कर्म्माणि । आब्दिकश्राद्धाद्यश्राद्धादिसपिण्डीकरणान्तश्राद्धानि चान्द्रायणप्राजापत्यादिव्रतानि दानकर्म्मनित्यस्नानं गृहपुष्करिण्यादिप्रतिष्ठा साधारणतिथिविहितकर्म्म । गौणचान्द्रे अष्टकादिपार्व्वणश्राद्धं वारुणीस्नानं जन्मतिथिकृत्यं जन्माष्टम्याद्युपवासः दुर्गोत्सवादितिथिनियतपूजा । सामान्यत्रिंशत्तिथ्यात्मकमासेन मासिकादिमासगणना । इति स्मृतिः ॥

चान्द्रायणं, क्ली, (चान्द्रस्य चन्द्रलोकस्य अयनं प्राप्तिर्यस्मात् । "धर्म्मार्थं यश्चरेदेतच्चन्द्रस्येति सलोकताम् ।" इति याज्ञवल्क्यवचनादेव तथात्वम् । यद्वा चन्द्रः अमृतानन्दमयपुरुषः अयनं आश्रयोऽधिष्ठातृदेवो यस्य व्रतस्य यत्र व्रते वा ।) व्रतविशेषः । तत्पर्य्यायः । इन्दुव्रतम् २ । इति त्रिकाण्डशेषः ॥ तत्तु चतुर्व्विधं पिपीलिकामध्याख्यम् १ यवमध्याख्यम् २ यतिचान्द्रायणम् ३ शिशुचान्द्रायणम् ४ । यथा,—
"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥"
"एतदेव पिपीलिकामध्याख्यम् ।" इति कुल्लूकभट्टः ॥
"एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम् ॥
अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् ॥"
इति मनुः ॥
तद्विधानं यथा, गारुडे १०५ अध्याये ।
"तिथिपिण्डांश्चरेद्बुद्धा शुक्ले शिख्यण्डसंमितान् ।
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरेत् ॥
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपयुञ्जीत चान्द्रायणमथापरम् ॥
कुर्य्यात्त्रिषवणं स्नानं पिण्डं चान्द्रायणं चरेत् ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभिमन्त्रयेत् ॥
अनादिष्टेषु सर्व्वेषु शुद्धिश्चान्द्रायणेन च ।
धर्म्मार्थी यश्चरेदेतत् चन्द्रस्यैति सलोकताम् ॥
कृच्छ्रकृद्धर्म्मकामस्तु महतीं श्रियमश्नुते ॥"
अपि च ।
"एकैकं वर्द्धयेत् पिण्डं शुक्ले कृष्णे च ह्रासयेत् ।
उपस्पृश्य त्रिषवणं विपरीताघमर्द्दनम् ॥"
इति तत्रैव २२६ अध्यायः ॥

चान्द्री, स्त्री, श्वेतकण्टकारी । (चन्द्रस्य इयम् । चन्द्र+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् स्त्रियां ङीप् ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥ (चन्द्रसम्बन्धिनि त्रि । यथा, माघे । २ । २ ।
"गुरुकाद्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रियम् ॥")

चापं, क्ली पुं, (चपस्य वंशविशेषस्य विकारः । "अवयवे च प्राण्यौषधिवृक्षेभ्यः ।" ४।३।१३५। इत्यण् ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥ (यथा, रघुः । १२ । ४७ ।
"क्रमशस्ते पुनस्तस्य चापात् सममिवोद्ययुः ॥"
वृत्तक्षेत्रार्द्धः । यथा, सिद्धान्तशिरोमणौ ।
"दलीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तूर्य्यगोलम् ॥"
नवमराशिः । यथा, वृहत्संहितायाम् ।४२।१०।
"चापगते गृह्णीयात् कुङ्कुमशङ्खप्रवालकाचानि॥")

चापपटः, पुं, (चापो धनुस्तद्वत् वक्रीभूताकृतिः पटः पत्रं यस्य ।) पियालवृक्षः । इति जटाधरः॥

चापलं, क्ली, (चपलस्य भावः कर्म्म वा युवादित्वादण् ।) अनवस्थितिः । इति हेमचन्द्रः । २ । २२६ ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ।
"मात्सर्य्यद्वेषरागादेश्चापलन्त्वनवस्थितिः ॥"
(यथा, रघुः । १ । ६ ।
"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥")

चापल्यं, क्ली, (चपलस्य भावः कर्म्म वा । ब्राह्मणादित्वात् ष्यञ् ।) चपलता । चाञ्चल्यम् । यथा,
"परदारं परद्रव्यं परीवादं परस्य च ।
परीहासं गुरोः स्थाने चापल्यञ्च विवर्ज्जयेत् ॥"
इति चाणक्ये । ३० ॥

चामरं, क्ली पुं, (चमरी मृगविशेषस्तस्या इदम् । चमरी+अण् ।) चमरीपुच्छलोमनिर्म्मितव्यजनम् । चौरी । इति भाषा ॥ तत्पर्य्यायः । प्रकीर्णकम् २ । इत्यमरः । २ । ८ । ३१ ॥ चमरम् ३ चामरा ४ चामरी ५ । इति भरतः ॥ वालव्यजनम् ६ रोमगुच्छकम् ७ । इति रभसः॥ (यथा, पञ्चतन्त्रे । ३ । २६६ ।
"गुणेषु रागो व्यसनेष्वनादरो
रतिः सुभृत्येषु च यस्य भूपतेः ।
चिरं स भुङ्क्ते चलचामरांशुकां
सितातपत्राभरणां नृपश्रियम् ॥")
अस्य वायुगुणः । ओजःकारित्वम् । मक्षिकादिशयोहनत्वञ्च । इति राजवल्लभः ॥ * ॥
अथ चामरोद्देशः ।
"हस्तद्वयोन्नतः शुक्लः सुवर्णवलिभूषितः ।
हीरेणालङ्कृतो राज्ञां भयमानसुखप्रदः ॥
बलेश्चामरदैर्घ्याद्वा आयामत्वं प्रकाशितम् ।
भयो भद्रो जयः शीलः सुखः सिद्धिबलः स्थिरः ॥
वितस्त्येकैकसंवृद्धा दिनेशादिदिशां सुवाम् ।
सौवर्णं राजतं युग्मं चेदेशानां महीभुजाम् ॥
योजयेदिति निश्चित्य बलिकल्पनकर्म्मणि ।
स्थलजं जाङ्गलो राजा अनूपो जलजं वहेत् ॥
हीरश्च पद्मरागश्च वैदूर्य्यं नील एव च ।
मणिर्वलिषु योक्तव्यो ब्रह्मादीनां यथाक्रमम् ॥*॥